http://www.mpboardonline.com

Roll No. ....................................

Total No. of Questions : 19

Total No. of Printed Pages : 8

Serial Number

0000726

# E-705

High School, Examination - 2019

(BLIND, DUMB / DEAF)

संस्कृत (सामान्यम्)

## SANSKRIT (GENERAL)

Time : 3 Hours ] [ Maximum Marks : 100

http://www.mpboardonline.com

निर्देश :

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) 'महेशः' इत्यस्य पदस्य सन्धिविच्छेदः अस्ति –

(i) महा + ईशः (ii) मह + ईशः

(iii) महे + इशः (iv) महे + शः

(ख) विसर्ग सन्धेः उदाहरणमस्ति –

(i) सुबन्तः (ii) प्रत्येक

(iii) भानुश्चलति (iv) वाङ्मयम्

(ग) "वाक् + ईशः" इत्यस्य पदस्य संधिः अस्ति –

(i) वाक्ईशः (ii) वागीशः

(iii) वाकीशः (iv) वागिशः

(घ) "हरेऽव" इत्यस्मिन् पदे संधिः अस्ति –

(i) यणसन्धिः (ii) गुणसन्धिः

(iii) अयादि–सन्धिः (iv) पूर्वरूप–सन्धिः

(ङ) "सदाचारः एव परमो धर्मः" एतस्मिन् वाक्ये अव्ययम् अस्ति –

(i) एव (ii) सदाचारः

(iii) परमो (iv) धर्मः



http://www.mpboardonline.com

http://www.mpboardonline.com

2 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) "पञ्चवटी" इत्यस्मिन् पदे समासः अस्ति –

(i) द्वन्द्वः (ii) द्विगुः

(iii) कर्मधारयः (iv) बहुब्रीहिः

(ख) तत्पुरुषसमासस्य उदाहरणम् अस्ति –

(i) चन्द्रशेखरः (ii) पितरौ

(iii) त्रिभुवनम् (iv) ग्रामगतः

(ग) "पितरौ" इत्यस्यपदस्य समासविग्रहः भवति –

(i) माता–पिता (ii) माता च पिता

(iii) माता च पिता च (iv) मातापिता च

(घ) 'संस्कारः' इत्यस्मिंन् पदे उपसर्गः अस्ति –

(i) सम् (ii) स

(iii) संस् (iv) निस्

(ङ) अधोलिखितेषु पदेषु उपसर्गः अस्ति –

(i) यदा (ii) कदा

(iii) सदा (iv) अधि

3 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) "वदिष्यन्ति" इत्यस्मिन् पदे लकारः अस्ति –

(i) लट्लकारः (ii) लोटलकार

(iii) लृट्लकारः (iv) लङ्लकारः

(ख) "लिखामि" इत्यस्मिन् पदे पुरुषः अस्ति –

(i) प्रथमपुरुषः (ii) उत्तमपुरुषः

(iii) अन्यपुरुषः (iv) मध्यमपुरुषः

(ग) "पिबन्तु" इत्यस्मिन् पदे वचनम् अस्ति –

(i) एकवचनम् (ii) द्विवचनम्

(iii) त्रिवचनम् (iv) बहुवचनम्

(घ) "अगच्छम्" इत्यस्मिन् पदे धातुः अस्ति –

(i) गम् (ii) गच्छ्

(iii) अगच्छ (iv) गाछ

(ङ) 'अहम् अपि आपणं गच्छामि' इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(i) अहम् (ii) अपि

(iii) गच्छामि (iv) आपणं



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

4 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) "कृतवान्" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) मतुप् (ii) क्तवतु
(iii) क्त (iv)) ल्यप्

(ख) "बाला" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) ङीप् (ii) ङीष्
(iii) टाप् (iv) ङीन्

(ग) "पठ् + तव्यत्" इत्यस्य पदं भविष्यति –

(i) पठितव्यम् (ii) पठतव्यत्
(iii) पठतव्यम् (iv) पठीतव्यम्

(घ) 'जेतुम्' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) अनीयर् (ii) तुमुन्
(iii) शतृ (iv) क्त्वा

(ङ) ........... च सारं च वचोहि वाग्मिता ।

(i) मितम् (ii) प्रियम्
(iii) मधुरम् (iv) लघुः

5 प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत : 1×5=5

(स्वभावो, समयः, मनः, बहवः, सर्पः)

(i) तन्मे ...................... शिवसंकल्पमस्तु ।

(ii) अतीत्य हि गुणान्सर्वान् ...................... मूर्ध्नि वर्तते ।

(iii) गुरुकुले ...................... शिष्याः आसन् ।

(iv) अन्येषां वस्तूनां अपेक्षया ...................... अधिकः महत्त्वपूर्णः वर्तते ।

(v) ...................... क्रूरः खलः क्रूरः सर्पात्क्रूरतरः खलः ।

6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत – 3×2=6

(i) महर्षिः दयानन्दः कस्य स्थापनां कृतवान् ?

(ii) सुतापेक्षी कः आसीत् ?

(iii) शिष्यान् कथं परीक्ष्येत् ?

(iv) मानवजीवनस्य उन्नत्यै अतिमहत्त्वपूर्णं किं भवति ?

(v) विदिशानगरी कस्मिन प्रदेशे स्थिता विद्यते ?



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

7 अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि निर्देशानुसारं लिखत – 2

(i) 'साधु' तृतीया विभक्तिः एकवचनम्

(ii) 'राम' पंचमी विभक्तिः बहुवचनम्

(iii) 'युष्मद्' प्रथमा विभक्तिः द्विवचनम्

8 "रमायै" अथवा "पित्रा" इति पदस्य विभक्तिं वचनं च लिखत । 2

9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(क) "बुन्देलकेसरी" इति विख्यातस्य छत्रसालस्य जन्म (१६४९) एकोनपञ्चाशदुत्तरषोऽशशततमे ईस्वीये मध्यप्रदेशस्य 'टीकमगढ़' जनपदस्य मयूरपर्वतीयक्षेत्रे (मोरपहाड़ी) लिधौराग्रामसमीपे अभवत् । छत्रसालस्य मातुर्नाम लालकुँवर पितुर्नाम च चम्पतरायः इत्यासीत् । अयं वीरः बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुं प्रयतते स्म । यथासमये एतदर्थम् एव छत्रसालः शिववीरमहाराजम् अपि मिलितवान् । http://www.mpboardonline.com

(i) बुन्देलकेसरी इति कः विख्यातः अस्ति ?

(ii) छत्रसालस्य जन्म कदा अभवत् ?

(iii) मध्यप्रदेशस्य कस्मिन जनपदे ग्रामे च छत्रसालस्य जन्म अभवत् ?

(iv) छत्रसालस्य मातुः पितुः च नाम लिखत ।

(v) भारतमातरं विमोक्तुं छत्रसालः कं मिलितवान् ?

(ख) काकस्य रटनं श्रुत्वा वृक्षस्य समीपे चरन्तः वृक्षाग्रेऽयमानाः वृक्षस्य कोटरेषुनिवसन्तः च सर्वेप्राणिनः पशवः पक्षिणः सर्पाश्च समायाताः । तेषां मध्ये प्रथमं सर्पः फटाटोपं कुर्वन् न्यगदत् "पितृपितामहानां कालादपि अहम् अत्रैवनिवसामिअतोऽयं वृक्षः मदीय एव । ततः शाखातः शाखान्तरं चंक्रम्य एकः कीटः प्रत्यवदत्" मदीयैः अर्भकैः सार्द्धम् अहं बहुवर्षेभ्यः अत्रैव उषितवानस्मि अतोऽयं वृक्षः ममैव इति ।

(i) काकस्य किं श्रुत्वा सर्वे प्राणिनः समायातः ?

(ii) तेषां मध्ये प्रथमं कः न्यगदत् ?

(iii) शाखातः शाखान्तरं चक्रम्य कः प्रत्यवदत् ?

(iv) कीटः किं प्रत्यवदत् ?

(v) 'श्रुत्वा' इत्यस्य पदस्य प्रकृतिप्रत्ययं च पृथक् कुरुत ।



http://www.mpboardonline.com
http://www.mpboardonline.com
http://www.mpboardonline.com

http://www.mpboardonline.com

(ग) ततौऽसौ देशाद्देशान्तरं विचरन् व्याकरणवेदान्तादीन्यनेकशास्त्राणि विशेषतः योगपद्धतिं च अशिक्षत् । विचरणकालेऽयं नर्मदातीरे स्वामिपूर्णानन्दसरस्वतिसकाशात् सन्यासमगृहणात् । तदा एषः दयानन्दसरस्वतीति नाम्ना प्रसिद्धः जातः । अनन्तरंमथुरां गत्वा प्रज्ञाचक्षुषः स्वामिनः विरजानन्दात् बहुविधानि शास्त्राणि अशिक्षत् । विद्यासमाप्तौ गुरुः – तमादिशत् – वत्स ! देशोऽयमस्माकमविद्यान्धकारे पतितो वर्तते तद् गच्छ अविद्यान्धकारम् अपनय ।

(i) असौ कुत्र विचरन् व्याकरणवेदान्तादीनि शास्त्राणि अशिक्षत् ?

(ii) अयं कस्य सकाशाद् सन्यासमगृहणात् ?

(iii) तदाएषः किम् नाम्ना प्रसिद्धः जातः ?

(iv) प्रज्ञाचक्षुः कः आसीत् ?

(v) ''अशिक्षत्'' इत्यस्मिन् पदे कः लकारः अस्ति ?

10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(क) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्जवलाः,
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

(i) चन्द्रोज्जवलाः हाराः कं न विभूषयन्ति ?

(ii) वाण्येका पुरुषं किं करोति ?

(iii) कानि खलु क्षीयन्ते ?

(iv) सततं भूषणं किम् ?

(v) 'कुसुमं' इति शब्दस्य समानार्थी पदं लिखत ।

(ख) सत्येन धार्यते पृथ्वी, सत्येन तपते रविः ।
सत्येन वाति वायुश्च, सर्वं सत्ये प्रतिष्ठितम् ॥

(i) रविः केन तपते ?

(ii) पृथ्वी केन धार्यते ?

(iii) वायुः केन वाति ?

(iv) सर्वं कस्मिन् प्रतिष्ठितम् ?

(v) 'धार्यते' इत्यस्मिन पदे का धातुः अस्ति ?



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

(ग) मत्ता गजेन्द्रा मुदिता गवेन्द्रा
वनेषु विक्रान्ततरा मृगेन्द्राः ।
रम्या नगेन्द्रा निभृता नरेन्द्राः
प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥

(i) मत्ताः के ?
(ii) गवेन्द्राः कीदृशाः भवन्ति ?
(iii) वनेषु विक्रान्ततरा के ?
(iv) के निभृताः सन्ति ?
(v) सुरेन्द्रः कैः सह प्रक्रीडितः ?

11 युग्ममेलनं कुरुत – (कोऽपि चत्वारः) 1×4=4

| (अ) | (आ) |
|---|---|
| (i) ज्येष्ठः | (क) मुनिः (ii) |
| (ii) मार्कण्डेयः | (ख) कालः (iv) |
| (iii) बालैः सह सख्यम् | (ग) वहन्ति (5) |
| (iv) परीक्षणस्य | (घ) पितृसमः (i) |
| (v) नद्यः | (ङ) न कुर्यात् |

12 शुद्ध वाक्यानां समक्षं "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत (कोऽपि चत्वारः) – 1×4=4

(i) संस्कृतं विश्वस्य महत्तमा भाषा अस्ति ।
(ii) कश्चित् सिंहः घण्टारवमाकर्ण्य समायातः ।
(iii) शुद्धोदनः राहुलस्य पिता आसीत् ।
(iv) यत् महाभारते अस्ति तदन्यत्र नास्ति ।
(v) भगीरथः गङ्गां भूमौ न आनीतवान् ।

13 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत – 1×4=4

(i) पुरुषादः कः आसीत ?
(ii) रथकारस्य नाम किम् आसीत् ?
(iii) जलं विना किं न सम्भवम् ?
(iv) मैत्रेयी कस्य पत्नी आसीत ?
(v) मनः जाग्रतः कुत्र उदैति ?



http://www.mpboardonline.com
http://www.mpboardonline.com
http://www.mpboardonline.com

http://www.mpboardonline.com

14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत । **4**

15 स्वप्राचार्यस्यकृते पञ्चदिवसानां अवकाशार्थं एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत । **4**

**अथवा**

स्वमित्राय एकम् आमन्त्रण–पत्रं संस्कृतभाषायां लिखत ।

16 अधोलिखितेषु पञ्च अशुद्धकारक वाक्यानां शुद्धिः कुरुत – **1×5=5**

(i) गुरुः नमः

(ii) उपवनः परितः जनाः भ्रमन्ति ।

(iii) अलं कोलाहलस्य ।

(iv) गङ्गा हिमालयस्य प्रवहति ।

(v) गणेशः शिवः पुत्रः अस्ति ।

(vi) पुस्तकम् उत्पीठिकया अस्ति ।

17 अधोलिखित वाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत – **1×5=5**

(i) सगरस्य वंशे भगीरथस्य जन्म अभवत् । 3

(ii) सूर्यवंशस्य राजा सगरः आसीत् । 1

(iii) भगीरथः नदीं भूमितः पातालं नीतवान् । 4

(iv) सगरपुत्राः स्वर्गलोकं गतवन्तः । 5

(v) कुपितः मुनिः तान् सगरपुत्रान् क्रोधाग्निना दग्धवान् । 2

18 अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – **5**

स्वस्थशरीरे एव स्वस्थाबुद्धिः वसति । स्वस्था बुद्धिः एव स्वस्थविचाराणां जननी अस्ति । व्यायामशीलः मनुष्यः एव नीरोगः चिरंजीवी च भवति । व्यायामशीलाः मनुष्याः प्रायेण रुग्णाः न भवन्ति । विविधरोगाणां चिकित्सा अपि व्यायामेन सम्भवति । अतः जीवनस्य कृते व्यायामः परमावश्यकः ।

(i) उपर्युक्तः गद्यांशस्य उचित शीर्षकं लिखत ।

(ii) स्वस्था बुद्धिः कुत्र वसति ?

(iii) का स्वस्थविचाराणां जननी अस्ति ?

(iv) कः नीरोगः भवति ?

(v) विविध रोगाणां चिकित्सा केन सम्भवति ?



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

19 अधोलिखितेषु विषयेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 10

(i) अनुशासनम्

(ii) संस्कृत भाषायाः महत्त्वम्

(iii) मम दिनचर्या

(iv) अस्माकं देशः

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

Whatsapp @ 9300930012
Your old paper & get 10/-
पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से



http://www.mpboardonline.com